National Journal of Advanced Research
Online ISSN: 2455-216X; Impact Factor: RJIF 5.12
www.allnationaljournal.com
Volume 2; Issue 5; September 2016; Page No. 52-53

# वैयाकरणनये शब्दार्थसम्बन्धः

**बृजभूषण शर्मा**

शोधच्छात्रः (J.R.F) संस्कृतविभागः राज0 विश्व0 जयपुरम्, राजस्थान, भारत।

**प्रस्तावना**

विदितरमेव समैरपि यदखिलेऽपि विरिञ्चि प्रपञ्चे ब्रह्मणः सर्वश्रेष्ठा कृतिर्मानव इति। अस्याश्च श्रेष्ठकृतेरूद्धारार्थं प्रददौ विधिः विविधज्ञानविज्ञान–समन्वितां संस्कृतेराधारभूतां कर्त्तव्याकर्त्तव्यबोधिकां जीवनोन्नायिकां विश्वहितसम्पादिकां चतुर्वर्गावाप्ति–सोपानस्वरूपां वेदराशिं लोकाय। एतादृशराशेरवबोधाय मानवजात्यै विद्यते व्याकरणशास्त्रस्य महत्यावश्यकतेति 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति महाभाष्यकार–पतञ्जल्युक्त्या, प्रथमे हि विद्वांसो वैयाकरणा व्याकरणमूलत्वात् सर्वविद्यानाम् इति ध्वनिकारोक्त्या च ज्ञायते।

शब्दसाधुत्वप्रतिपादकेऽस्मिन् शास्त्रे शब्दार्थयोः सम्बन्धस्य चर्चा महती कृता वर्तते। तत्र हि शब्दार्थबोधः इति सार्वजनीनोऽनुभवः तत्र कैश्चित् श्रुतैः शब्दैः जायतेऽर्थावबोधः कैश्चित्तु नार्थसम्प्रत्ययः। येनापि शब्देन जायतेऽर्थावबोधः तेन न सर्वेषामर्थानामवबोधः किन्तु कश्चिद्वि–शिष्टस्यैवार्थस्यावबोधः। हेतुनानेन विज्ञायते यत् विद्यते कश्चन् विशिष्टसम्बन्धः शब्दार्थयोः। येन तत्तच्छब्दः तत्तदर्थस्यैव बोधकः नान्यस्येति।

कश्च तादृशः विशिष्टसम्बन्धः शब्दार्थयोरिति जातायां जिज्ञासायां समाधीयते। तत्र सिद्धान्तवादिनो मीमांसका शब्दार्थयोः सम्बन्धं स्वीकुर्वन्ति, तदस्वीकारे घटशब्दात् पटबोधापत्तेः। घटशब्दो घटस्यैव वाचकः बोधकश्चेति, स्वभावस्यास्य पदपदार्थयोः सम्बन्ध एव नियामको भवितुमर्हति। मीमांसकानाम्मते शक्तिनामाभिधेयम्पदा–र्थान्तरमेव शब्दार्थयोः सम्बन्ध–त्वेन स्वीक्रियते।

नैयायिकास्तावत् 'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्याकारा 'इदं पदमिममर्थं बोधयतु' इत्याकारा वेश्वरेच्छा शक्तिः, तस्या एव विषयत्व–लक्षणः सम्बन्धः पदेऽर्थे जन्यजनकभावे बोधे चेति स्वीकुर्वन्ति।

तत्र तावत् वैयाकरणेष्वपि प्राचीनाः वैयाकरणाः शब्दे बोधकत्वमेव शब्दार्थयोः सम्बन्धं स्वीकुर्वन्ति। नव्यवैयाकरणास्तु पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावपरपर्याया, तद्ग्राहकञ्च इतरेतराध्यासमूलकं तादात्म्यम्। तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वं भेदाभेद–समनियतम्। एतदेव तादात्म्यं सम्बन्ध शब्दार्थयोः। उभयनिरूपिततादात्म्यवानुभय इति अर्थपदयोः व्यवहारात्। शक्तेरपि कार्यजनकत्वे कार्यस्यैव नियामकत्वात् दीपादिगतप्रकाश–कत्वशक्तावपि आलोकविषयसम्बन्धे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात्। एवञ्च तादात्म्यसम्बन्धं भर्तृहरिरपि समर्थयति। तद्यथा–

**उपकारस्य यत्रास्ति धर्मस्तत्रानुगम्यते।**
**शक्तिनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः।।**

**भगवान् पतञ्जलिरपि प्राह**

'सङ्केतस्तु पदपदार्थयोरितरे–तराध्यासरूपः स्मृत्यात्मकः, योऽयं शब्दः सोऽर्थः योऽर्थः स शब्दः' इति।

अयञ्च तादात्म्यसम्बन्धः पदे वाक्येऽपि भवति। तादात्म्यसम्बन्ध–स्वीकारादेव 'श्लोकमश्रृणोत' 'अर्थं श्रृणोति' 'अर्थं वदति' इत्यादि व्यवहारः। 'ओमित्येकाक्षरं ब्रह्म' 'रामेति द्वयक्षरं मानभङ्गो पिनाकिनः' 'वृद्धिरादैच्' इत्यादावपि तादात्म्यसम्बन्धस्वीकारादेवार्थावबोधः नान्यथा।

अयञ्च सम्बन्धः बौद्ध एव ग्राह्यः तेन वह्निगुडादि–शब्दोच्चारणेन मुखे दाहमाधुर्यरसापत्तिर्न जायते। भर्तृहरिणा तु कार्यकारणभावसम्बन्धोऽपि अङ्गीक्रियते। उक्तन्च –

**कार्यकारणभावेन योग्यभावेन च स्थिताः।**
**धर्मे च प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु।।**

वस्तुतः, सम्बन्धोऽयमपि तादात्म्यसम्बन्धद्योतक एव भवति इति नास्ति काऽपि विप्रतिपत्तिः। शब्दार्थ–सम्बन्धस्तुनित्य इति प्रतिपादयमास भर्तृहरिः –

**नित्याः शब्दार्थसम्बन्धाः तत्राम्नाता महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।।**

कात्ययनोऽपि प्रोवाच – 'सिद्धे शब्दार्थसम्बन्धे' इति। शेषावतार भगवान् पतञ्जलिरपि साधयामास शब्दार्थयोः नित्यत्वं 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकं व्याख्याय 'महाभाष्यम्' इति नामक ग्रन्थे। तदित्थम् –

लोके यस्य कस्यचित् शब्दस्य श्रवणे तेन शब्देन साकं तदर्थः, तत् सम्बन्धोऽपि बुद्धौ आयाति। शब्द–ज्ञानञ्च व्याकरणप्रक्रियाऽधीनं प्रक्रियाबोधनाय च महर्षिणा पाणिनिना सूत्राणि प्रणितानि। तत्र किं पाणिनिः एव शब्दार्थसम्बन्धानां स्रष्टा भवति, उत स्वाभावाविकतया स्थितानां तेषां त्रयाणां स्मर्ता भवति? इति शङ्का जायते।

तत्र वार्तिककारैः एवं समाहितम् – 'सिद्धे शब्दार्थसम्बन्धे' इति। शब्दः, अर्थः तयो द्वयोः सम्बन्धश्च नित्य एव। न तु नूतनतया तेषां सृष्टिर्भवति। अतः स्थिततानामेव शब्दार्थसम्बन्धानां स्मर्ता पाणिनिः भवति, न तु स्रष्टा भवति इति वार्तिककाराणामाशयः।

वार्त्तिके 'सिद्ध' शब्दस्य नित्यत्वरूपः अर्थः अभिप्रेतः। सिद्धशब्दः यद्यपि सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशम् इत्यादि प्रयोगेषु नित्यपर्यायवाची एव, तथापि सिद्धः ओदनः सिद्धः सूपः शिद्धा यवागूः इत्यादि प्रयोगेषु कार्यवाची अपि भवति। एवं च सिद्धशब्दस्य परस्परं विरूद्धे अर्थद्वये प्रयोगदर्शनेन वार्तिके सिद्धशब्देन नित्यवाचिनः एव ग्रहणम् इत्यत्र किं वा प्रमाणम् इति पुनः शङ्का आयाति।

अस्याः शङ्कायाः भाष्यकारैः एवं रीत्या समाधानम् उक्तम् – 'संग्रहः' नामके ग्रन्थे 'किं कार्यः शब्दः, अर्थ सिद्धः' इति पक्षद्वयविचारः कृतः। तत्र कार्य प्रतिपक्षार्थाभिधायी सिद्धशब्दः ज्ञायते। तेन सिद्धशब्दः नित्यपर्यायवाची एव। अथवा लोके 'एव' शब्दस्य अभावेऽपि तदर्थः प्रतीयते। यथा–अब्भक्षः, वायुभक्षः इत्यादौ अपः एव भक्षयति, वायुमेव भक्षयति इत्यर्थे दृश्यते। एवमेव प्रकृतवार्त्तिकेऽपि सिद्धः एव, न साध्यः इत्यर्थो लभ्यते। अतो न दोषः।

अथवा देवदत्तः, सत्यभामा इत्यादौ पूर्वपदलोपेन दत्तः, भामा इति यथा लोके व्यवहारो दृश्यते, तद्वत् प्रकृतेऽपि सिद्धः = अत्यन्तसिद्धः = नित्यः इति लभ्यते।

अथवा व्याकरणशास्त्रे यत्र कुत्राचित् संशयो भवति चेत् तन्निवारणार्थं व्याख्यानमेव आश्रियते। प्रकृते वृद्धव्यवहारात् एव शब्दार्थसम्बन्धानां नित्यत्वं सङ्ग्रहग्रन्थादौ स्थितम् इति हेतोः व्याख्यानात् सिद्धशब्देन नित्यत्वम् इत्येव अर्थः लभ्यते।
यद्यपि संदिग्धार्थस्य सिद्धशब्दस्य वार्तिके प्रयोगोऽपेक्षया 'नित्य' शब्द एव प्रयोक्तुं शक्यते, तथापि मङ्गलार्थं प्रथम वार्तिकेऽस्मिन् 'सिद्धशब्दः' एवं प्रयुक्तः अतोन दोषः।
एवं च नित्यानां शब्दार्थसम्बन्धानाम् आश्रयणेन शास्त्रमिदं प्रवृत्तम्।

**संदर्भ ग्रन्थ सूची**

1. ध्वन्यालोकः – चौखम्बा संस्करणम्
2. न्यायदर्शनम् – भारतीयविद्याप्रकाशनम्, वाराणसी, 1966
3. परमलघुमन्जूषा – चौखम्बा संस्करणम्, 1973
4. महाभाष्यम् – भारतीयाधिशासनसंरक्षकतायां प्रकाशितम्, भामत्रात्मक, मोतीलाल बनारसीदास, 1967
5. महाभाष्यटीका – भर्तृहरिरचिता हिन्दूविश्वविद्यालीय नेपालसंस्कृतग्रन्थमाला कुसुमम्।।, हिन्दूविश्वविद्यालयः, 1965
6. मीमांसादर्शनम् – षट्भागाः तन्त्रवार्तिक शावरभाष्य–समेतम्, आनंदश। श्रम प्रकाशनम्, 1947
7. वाक्यपदीयम् – तृतीयकाण्डः प्रथमभागः, दक्कन कॉलेज, पूना, 1963
8. वाक्यपदीयम् – तृतीयकाण्डः द्वितीयभागः, वाराणसी, 1928
9. वैयाकरणसिद्धान्तमन्जूषा – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1977
10. वैयाकरणसिद्धान्तलघुमन्जूषा – चौखम्बासंस्कृतग्रन्थ, माला, 1911